# Shrimad Ramana Pujavidhanam

# શ્રીમદ્રમણપૂજાવિધાનમ્

## Document Information

Text title : Shrimad Ramana Pujavidhanam

File name : ramaNapUjAvidhAnam.itx

Category : deities_misc, gurudev, pUjA, ramaNa-maharShi

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Latest update : December 25, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2023

*sanskritdocuments.org*

# શ્રીમદ્રમણપૂજાવિધાનમ્

અથ પાદૌ પ્રક્ષાલ્ય આચમ્ય પ્રાણાનાયમ્ય-
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાન્તયે ॥

પ્રણવસ્ય પરબ્રહ્મઋષિઃ દેવી ગાયત્રીચ્છન્દઃ સવિતા પરમાત્મા દેવતા
પ્રાણાયામે વિનિયોગઃ ॥

ૐ ભૂઃ ॥

સઙ્કલ્પઃ ॥

કરિષ્યમાણસ્ય કર્મણઃ નિર્વિઘ્નેન પરિસમાપ્ત્યર્થં આદૌ વિઘ્નેશ્વરપૂજાં
કરિષ્યે। અપ ઉપસ્પૃશ્ય ।
વિઘ્નેશ્વરપૂજા ॥

ગણાનાં ત્વા ગણપતિઁ હવામહે કવિં કવીનાં ઉપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આનશ્શ‍ૃણ્વન્નૂતિભિઃ સીદસાદનમ્ ॥

(સ્ત્રિયશ્ચેત્)
વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
અવિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

અસ્મિન્હરિદ્રાબિમ્બે મહાગણપતિં સ્મરામિ ધ્યાયામ્યાવાહયામિ ।
મહાગણપતયે નમઃ આસનં સમર્પયામિ।
મહાગણપતયે નમઃ પાદયોઃ પાદ્યં સમર્પયામિ ।
મહાગણપતયે નમઃ હસ્તયોઃ અર્ઘ્યં સમર્પયામિ ।
આચમનીયં સમર્પયામિ । સ્નાનં સમર્પયામિ ।
આપોહિષ્ઠામયોભુવઃ, તાનઊર્જેદધાતન, મહેરણાય ચક્ષસે, યોવશ્શિવતમો
રસઃ, તસ્ય ભાજયતેહનઃ, ઉશતીરિવ માતરઃ, તસ્મા અરઙ્ગમામવઃ,
યસ્ય ક્ષયાયજિન્વથ, આપોજનયથાચનઃ ।

સ્નાનાનન્તરં આચમનીયં સમર્પયામિ ॥

વસ્ત્રયજ્ઞોપવીતોત્તરીયાભરણાર્થાઃ ઇમે અક્ષતાઃ । એતે ગન્ધાઃ ।
ગન્ધાન્ ધારયામિ । ગન્ધસ્યોપરિ અક્ષતાન્ સમર્પયામિ । પુષ્પમાલાં
સમર્પયામિ । પુષ્પાણિ પૂજયામિ ॥

સુમુખાય નમઃ, એકદન્તાય નમઃ, કપિલાય નમઃ, ગજકર્ણકાય
નમઃ, લમ્બોદરાય નમઃ, વિકટાય નમઃ, વિઘ્નરાજાય નમઃ, ધૂમકેતવે નમઃ,
ગણાધ્યક્ષાય નમઃ, ફાલચન્દ્રાય નમઃ, શૂર્પકર્ણાય નમઃ, હેરમ્બાય નમઃ,
સ્કન્દપૂર્વજાય નમઃ, સિદ્ધિવિનાયકસ્વામિને નમઃ, મહાગણપતયે નમઃ,
પરિમલપત્રપુષ્પાણિ સમર્પયામિ। ધૂપાર્થં અક્ષતાન્ સમર્પયામિ । દીપાર્થં
અક્ષતાન્ સમર્પયામિ। ધૂપદીપાનન્તરમાચમનીયં સમર્પયામિ ॥

નૈવેદ્યમ્—ભૂર્ભુવસ્સુવઃ + દેવસવિતઃ પ્રસુવ ।
મહાગણપતયે નમઃ અમૃતોપસ્તરણમસિ સ્વાહા । પ્રાણાય સ્વાહા ।
અપાનાય સ્વાહા। વ્યાનાય સ્વાહા। ઉદાનાય સ્વાહા । સમાનાય સ્વાહા।
મહાગણપતયે નમઃ નાલિકેરખણ્ડદ્વયં કદલીફલં મહાનૈવેદ્યં નિવેદયામિ।
મધ્યે મધ્યે પાનીયં સમર્પયામિ।
ઉત્તરાપોશનં સમર્પયામિ । હસ્તપ્રક્ષાલનં સમર્પયામિ । પાદપ્રક્ષાલનં
સમર્પયામિ । નૈવેદ્યાનન્તરં આચમનીયં સમર્પયામિ ।
ભૂર્ભુવસ્સુવઃ ॥

પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ ।
કર્પૂરચૂર્ણસંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥

મહાગણપતયે નમઃ દિવ્યતામ્બૂલં સમર્પયામિ ।
સ્વર્ણપુષ્પદક્ષિણાં સમર્પયામિ। સર્વોપચારપૂજાં સમર્પયામિ।

પ્રાર્થના ॥

વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
અવિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

ઇતિ વિઘ્નેશ્વરપૂજા સમાપ્તા ॥

સઙ્કલ્પઃ ॥

શુભે શોભને મુહૂર્તે + શુભતિથૌ મમોપાત્તસમસ્તદુરિતક્ષયદ્વારા
પરમેશ્વરપ્રીત્યર્થં અસ્માકં સહકુટુમ્બાનાં ક્ષેમસ્થૈર્યધૈર્યવીર્યવિજયાયુરારો-

ગ્યૈશ્વર્યાભિવૃદ્ધ્યર્થં અહરહઃ સત્સન્તાનસમૃદ્ધ્યર્થં સમસ્તમઙ્ગલાવાપ્ત્યર્થં
સમસ્તદુરિતોપશાન્ત્યર્થં ધર્માર્થકામમોક્ષચતુર્વિધફલપુરુષાર્થસિદ્ધ્યર્થં
ઇષ્ટકામ્યાર્થસિદ્ધ્યર્થં (સુમઙ્ગલ્યઃ) દીર્ઘસૌમઙ્ગલ્યાવાપ્ત્યર્થં (ઇતરે)
જ્ઞાનવૈરાગ્યસિદ્ધ્યર્થં શ્રીરમણપ્રીત્યર્થં શ્રીરમણપ્રસાદસિદ્ધ્યર્થં યાવચ્છક્તિ
ષોડશોપચારવિધાનેન ભગવદ્રમણદેવતાપૂજાં કરિષ્યે । તદઙ્ગં કલશ
પૂજાં ચ કરિષ્યે । અપ ઉપસ્પૃષ્ય ।
વક્રતુણ્ડ મહાકાય ક્ષ્ સર્વદા । અસ્માત્ હરિદ્રાબિમ્બાત્ મહાગણપતિં
યથાસ્થાનં પ્રતિષ્ઠાપયામિ ઇતિ મહાગણપતિમુદ્વાસ્ય, કલશપૂજાં કુર્યાત્ ॥

કલશ ગન્ધપુષ્પાદ્યૈરભ્યર્ચ્ય કલશમભિમૃશ્ય જપેત્ ।
કલશસ્ય મુખે વિષ્ણુઃ કણ્ઠે રુદ્રસ્સમાશ્રિતઃ ।
મૂલે તત્ર સ્થિતો બ્રહ્મા મધ્યે માતૃગણાઃ સ્મૃતાઃ ॥

કુક્ષૌ તુ સાગરાસ્સર્વે સપ્તદ્વીપા વસુન્ધરા ।
ઋગ્વેદોઽથ યજુર્વેદઃ સામવેદોઽપ્યથર્વણઃ ॥

અઙ્ગૈશ્ચ સહિતાસ્સર્વે કલશામ્બુસમાશ્રિતાઃ ।
સર્વે સમુદ્રાસ્સરિતસ્તીર્થાનિ ચ નદા હ્રદાઃ ॥

આયાન્તુ ગુરુપૂજાર્થં દુરિતક્ષયકારકાઃ ।
ગઙ્ગે ચ યમુને ચૈવ ગોદાવરિસરસ્વતિ ।
નર્મદે સિન્ધુ કાવેરિ જલેઽસ્મિન્સન્નિધિં કુરુ ॥

(પૂજાદ્રવ્યાણિ સમ્પ્રોક્ષ્ય આત્માનં ચ પ્રોક્ષ્ય)
આગમાર્થં તુ દેવાનાં ગમનાર્થં તુ રક્ષસામ્ ।
કુર્વે ઘણ્ટારવં તત્ર દેવતાહ્વાનલાઞ્છનમ્ ॥

(ઇત્યનેન ઘણ્ટાનાદં કૃત્વા)
પુષ્પાક્ષતાન્ ગૃહીત્વા
અરુણાદ્રિચરં દેવમાશ્રિતાભયદાયિનમ્ ।
અપ્રાકૃતપરઞ્જ્યોતિરભેદધ્યાનશાલિનમ્ ॥

પ્રસન્નવદનં શાન્તં તેજોરાશિં જગદ્ગુરુમ્ ।
સર્વકલ્યાણદાતારં ગુરુમાવાહયામ્યહમ્ ॥

અસ્યાં પ્રતિકૃતૌ ભગવન્તં શ્રીરમણં ધ્યાયામ્યાવાહયામિ ॥

અનેકરત્નખચિતં મુક્તામણિવિભૂષિતમ્ ।

સ્વર્ણસિંહાસનં ચારુ રમણેશાનુગૃહ્યતામ્ ॥

શ્રીરમણભગવતે નમઃ રત્નસિંહાસનં સમર્પયામિ ॥

ગઙ્ગાદિસર્વતીર્થેભ્ય આહૃતં વિમલં જલમ્ ।
રમણેશ સુખસ્પર્શં પાદ્યાર્થમુપયુજ્યતામ્ ॥

શ્રીરમણભગવતે નમઃ પાદયોઃ પાદ્યં સમર્પયામિ ॥

અનર્ઘગુણજાલાય સર્વસિદ્ધિવિધાયિને ।
આજાનુબાહવે તુભ્યમિદમર્ઘ્યં મયાऽર્પિતમ્ ॥

શ્રીરમણભગવતે નમઃ હસ્તયોઃ અર્ઘ્યં સમર્પયામિ ॥

અફેનિલમિદં શીતં સુવર્ણકલશસ્થિતમ્ ।
તોયમાચમ્યતાં દેવ રમણેશાર્પિતં મયા ॥

શ્રીરમણભગવતે નમઃ આચમનીયં સમર્પયામિ ॥

દધિક્ષીરઘૃતોપેતં શર્કરામધુસંયુતમ્ ।
મધુપર્કં ગૃહાણેમં મહનીય મહાગુરો ! ॥

શ્રીરમણભગવતે નમઃ મધુપર્કં સમર્પયામિ ॥

અરુણાદ્રિદરીવાસ કરુણામયવિગ્રહ !॥

પઞ્ચામૃતસ્નાનમિદં સ્વીકુરુષ્વ જગદ્ગુરો ॥

શ્રીરમણભગવતે નમઃ પઞ્ચામૃતસ્નાનં સમર્પયામિ ॥

ગઙ્ગાદિપુણ્યતીર્થેભ્યસ્સમાનીતમિદં જલમ્ ।
સ્નાનાર્થમુપક્લૃપ્તં તે ગૃહ્યતાં રમણપ્રભો ॥

શ્રીરમણભગવતે નમઃ શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ક્ષૌમં પીતામ્બરં દિવ્યં દેવતાર્હં સુમઙ્ગલમ્ ।
ગૃહ્યતાં દેવદેવેશ ભક્ત્યા પરમયાऽર્પિતમ્ ॥

શ્રીરમણભગવતે નમઃ વસ્ત્રં સમર્પયામિ ॥

રાજતં બ્રહ્મસૂત્રં ચ કાઞ્ચનઞ્ચોત્તરીયકમ્ ।
ગૃહીત્વા રમણેશાન ત્રાહિ માં ભવસાગરાત્ ॥

શ્રીરમણભગવતે નમઃ યજ્ઞોપવીતં સમર્પયામિ ॥

સુગન્ધિચન્દનં દિવ્યં શ્રીખણ્ડોત્થં મનોહરમ્ ।
કર્પૂરકુઙ્કુમોપેતં રમણ પ્રતિગૃહ્યતામ્ ॥

શ્રીરમણભગવતે નમઃ પરિમલગન્ધાન્ ધારયામિ ॥

અક્ષતાન્ ધવલાન્ દિવ્યાન્ શાલીયાંસ્તણ્ડુલાન્ શુભાન્ ।
હરિદ્રાચૂર્ણસંયુક્તાન્ સઙ્ગૃહાણારુણેશ્વર ॥

શ્રીરમણભગવતે નમઃ ગન્ધસ્યોપરિ અક્ષતાન્ સમર્પયામિ ॥

સુગન્ધીનિ સુપુષ્પાણિ જાતીકુન્દમુખાનિ ચ ।
માલતીવકુલાદીનિ પૂજાર્થં પ્રતિગૃહ્યતામ્ ॥

શ્રી રમણભગવતે નમઃ પુષ્પમાલાં સમર્પયામિ ॥

પુષ્પાણિ પૂજયામિ ।
અથાઙ્ગપૂજા ॥

પૂજ્યપાદાય નમઃ પાદૌ પૂજયામિ
ગૂઢગુલ્ફાય નમઃ ગુલ્ફૌ પૂજયામિ
પારાશર્યાય નમઃ જાનુની પૂજયામિ
પરમાચાર્યાય નમઃ જઙ્ઘે પૂજયામિ
પાશમોચકાય નમઃ કટિં પૂજયામિ
પરમાર્થજ્ઞાય નમઃ નાભિં પૂજયામિ
આવર્તક્ષેત્રજાતાય નમઃ પાર્શ્વે પૂજયામિ
ભૂમિહૃદયક્ષેત્રગાય નમઃ હૃદયં પૂજયામિ
શ્રીકણ્ઠાય નમઃ કણ્ઠં પૂજયામિ
ચિન્મુદ્રિણે નમઃ કરૌ પૂજયામિ
વાગ્મિને નમઃ વાચં પૂજયામિ
સુરદનાય નમઃ દન્તાન્ પૂજયામિ
સુપ્રસન્નાય નમઃ મુખં પૂજયામિ
મૌનિને નમઃ જિહ્વાં પૂજયામિ
વિશાલાક્ષાય નમઃ નેત્રે પૂજયામિ
સુલલાટાય નમઃ લલાટં પૂજયામિ
રમણાય નમઃ શિરઃ પૂજયામિ
સર્વાત્મને નમઃ સર્વાઙ્ગં પૂજયામિ
(અનન્તરં શ્રીરમણાષ્ટોત્તરશતસહસ્રનામાર્ચનં યથાશક્તિ કાર્યમ્)

વનસ્પતિરસો દિવ્યઃ ગન્ધાઢ્યસ્સુમનોહરઃ ।
આઘ્રેયસ્સર્વદેવાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥

શ્રીરમણભગવતે નમઃ ધૂપમાઘ્રાપયામિ ।
જ્યોતિષાં ત્વં પરં જ્યોતિસ્તેજસ્ત્વં તેજસામપિ ।
આત્મજ્યોતિરિદં દીપજ્યોતિરસ્તુ તવાનઘ ॥

શ્રીરમણભગવતે નમઃ દીપં સન્દર્શયામિ ।
ધૂપદીપાનન્તરમાચમનીયં સમર્પયામિ ।
॥ નૈવેદ્યમ્ ॥

ભૂર્ભુવસ્વઃ ॥ પ્રસુવ । શ્રીરમણ ॥ । નમઃ
અમૃતોપસ્તરણમસિ સ્વાહા ॥ પ્રાણાય સ્વાહા ॥ સમાનાય સ્વાહા
મધુ મધુ મધુ ।
નૈવેદ્યં ષડ્રસોપેતં ભક્ષ્યભોજ્યં ચતુર્વિધમ્ ।
સઘૃતં સફલં દેવ ગૃહ્યતાં રમણેશ્વર ! ॥

શ્રીરમણભગવતે નમઃ નૈવેદ્યં સમર્પયામિ ।
મધ્યે મધ્યે પાનીયં સમર્પયામિ । હસ્તપ્રક્ષાલનં સમર્પયામિ ।
પાદપ્રક્ષાલનં સમર્પયામિ । નૈવેદ્યાનન્તરં આચમનીયં સમર્પયામિ ।
પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ ।
કર્પૂરચૂર્ણસંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥

શ્રીરમણભગવતે નમઃ દિવ્યતામ્બૂલં સમર્પયામિ ।
સૌવર્ણીં રાજતીં તામ્રાં નાનારત્નસમન્વિતામ્ ।
પૂજાસાદ્ગુણ્યસિદ્ધ્યર્થં દક્ષિણામર્પયામ્યહમ્ ॥

શ્રીરમણભગવતે નમઃ સ્વર્ણપુષ્પદક્ષિણાં સમર્પયામિ ।
ચન્દ્રાદિત્યૌ ચ ધરણિર્વિદ્યુદગ્નિસ્તથૈવ ચ ।
ત્વમેવ સર્વજ્યોતીંષિ ભજ નીરાજનં પ્રભો ॥

શ્રીરમણભગવતે નમઃ કર્પૂરનીરાજનં સમર્પયામિ ।
નીરાજનાનન્તરં આચમનીયં સમર્પયામિ ।
તતઃ પુષ્પાઞ્જલિં સમર્પયામિ ।
॥ પ્રદક્ષિણમ્ ॥

યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ ।

તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણપદે પદે ॥

નમસ્તે રમણેશાન નમસ્તે મુનિકુઞ્જર ।
નમસ્તે કરુણામૂર્તે નમસ્તે સર્વસિદ્ધિદ ॥

શ્રીરમણભગવતે નમઃ અનન્તકોટિપ્રદક્ષિણનમસ્કારાન્ સમર્પયામિ ।
ત્વદ્ભક્તિગન્ધસંયુક્તં ત્વત્કૃપાકાઙ્ક્ષયાયુતમ્ ।
મનઃપુષ્પાઞ્જલિં તુભ્યં ગૃહાણ રમણાર્પિતમ્ ॥

શ્રીરમણભગવતે નમઃ મન્ત્રપુષ્પાઞ્જલિં સમર્પયામિ ।
॥ પ્રાર્થના ॥

સાધુ વાઽસાધુ વા કર્મ યદ્યદાચરિતં મયા ।
તત્સર્વં દયયા નાથ ગૃહાણારાધનં મમ ॥

જગતાં નાયકસ્વામિન્ દેશિકસ્વાત્મનાયક ।
ત્રાહિ ત્રાહિ કૃપાસિન્ધો પૂજાં પૂર્ણતરાં કુરુ ॥

જ્ઞાનતોઽજ્ઞાનતો વાપિ યન્મયાચરિતં પુરા ।
તવ કૃત્યમિતિ જ્ઞાત્વા ક્ષમસ્વ રમણપ્રભો ॥

એવં ક્ષમાપણં પ્રાર્થ્ય શ્રીરમણં સ્વસ્મિન્વિલીનં ભાવયેત્ ।
હૃત્પદ્મકર્ણિકામધ્યે જ્ઞાનેન સહ સદ્ગુરો ।
પ્રવિશ ત્વં મહાયોગિન્ સર્વૈર્ભક્તગણૈસ્સહ ॥ ઇતિ ।
મયા કૃતમિદં શ્રીરમણભગવત્પૂજાખ્યં કર્મ સર્વં શ્રીબ્રહ્માર્પણમસ્તુ ।
ૐ તત્ સત્ ।
બ્રાહ્મણેભ્ય ઉપાયનદાનમ્ । ઘણ્ટાદેવતા નિવેદનમ્ ।

ઇતિ શ્રીરમણભગવત્પૂજાવિધાનં સઙ્ક્ષિપ્તં સમાપ્તમ્ ।

Proofread by Aruna Narayanan

*Shrimad Ramana Pujavidhanam*
pdf was typeset on December 25, 2023

Please send corrections to *sanskrit@cheerful.com*